"वृश्चिके शुक्लपक्षे तु या पाषाणचतुर्द्दशी ।
तस्यामाराधयेद्गौरीं नक्तं पाषाणभोजनैः ॥
पाषाणभोजनैः पाषाणाकारपिष्टकभोजनैः ।"
इति तिथ्यादितत्त्वम् ॥

पाषाणदारकः, पुं, (दारयति विदारयतीति । दृ+णिच्+ण्वुल् । पाषाणस्य दारकः ।) टङ्कः । इति हेमचन्द्रः । ३ । ५८३ ॥

पाषाणदारणः, पुं, (दारयतीति । दॄ+णिच्+ल्युः । पाषाणस्य दारणो विदारकः ।) टङ्कः । इत्यमरः । २ । १० । ३४ ॥

पाषाणभेदनः, पुं, (पाषाणं अश्मरीं भिनत्तीति । भिद्+ल्युः ।) वृक्षविशेषः । पाड्गुड़ी इति भाषा । तत्पर्य्यायः । अश्मघ्नः २ शिलाभित् ३ अश्मभेदकः ४ श्वेता ५ उपलभेदी ६ पलभित् ७ शिलागर्भजः ८ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । मेहकृद्दाहमूत्रकृच्छ्राश्मरीनाशित्वम् । शीतलत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पाषाणभेदकोऽश्मघ्नो गिरिभिद्भिन्नयोजनी ।
अश्मभेदो हिमस्तिक्तः कषायो वस्तिशोधनः ॥
भेदनो हन्ति दोषार्शोगुल्मकृच्छ्राश्महृद्रुजः ।
योनिरोगान् प्रमेहांश्च प्लीहशूलव्रणानि च ॥"
इति भावप्रकाशः ॥

पाषाणभेदी, [न्] पुं, (पाषाणं अश्मरीं भिनत्तीति । भिद्+णिनिः ।) वृक्षविशेषः । पाथरचुर इति भाषा । तत्पर्य्यायः । अश्मभेदः २ शिलाभेदः ३ अश्मभित् ४ । इति रत्नमाला ॥ (अश्मभेदशब्दे ज्ञातव्यमस्य विवरणम् ॥)

पाषाणी, स्त्री, (पाषाण+अल्पार्थे ङीष् ।) क्षुद्रपाषाणः । स तु परिमापकविशेषः । बाट्खारा इति भाषा । तत्पर्य्यायः । दृषाकरा २ । इति शब्दचन्द्रिका ॥

पाहातः, पुं, (पाति रक्षति दुष्कृतेभ्य इति । पा+क्विप् । पां त्रयीधर्म्मं हन्ति गच्छतीति । हन गतौ+डः । पाहं ब्रह्माणं अततीति । अच् ।) ब्रह्मदारुवृक्षः । इति शब्दचन्द्रिका ॥

पि, श गतौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) श, पियति । इति दुर्गादासः ॥

पिकः, पुं, (अपि कायति शब्दायते इति । अपि+कै+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः । अपेरकारलोपः ।) कोकिलः । इत्यमरः ॥ २ । ५ । १८ । (यथा,—
"पिक ! विधुस्तव हन्ति समं तम-
स्त्वमपि चन्द्रविरोधिकुहूरवः ।
इति तयोरनिशं हि विरोधिता
कथमहो समता मम तापने ॥"
इत्युद्भटः ॥)

पिकप्रिया, स्त्री, (पिकानां प्रिया ।) महाजम्बूः । इति राजनिर्घण्टः ॥

पिकबन्धुः, पुं, (पिकानां बन्धुरिव ।) आम्रवृक्षः । इति त्रिकाण्डशेषः ॥

पिकरागः, पुं, (पिकानां रागोऽनुरागो यत्र ।) आम्रवृक्षः । इति राजनिर्घण्टः ॥

पिकवल्लभः, पुं, (पिकानां वल्लभः ।) आम्रवृक्षः । इति भावप्रकाशः ॥ (गुणाश्चास्य आम्रशब्दे ज्ञातव्याः ॥)

पिकाक्षः, पुं, (पिकस्य अक्षि लोचनं तद्वत् वर्णो यस्य । समासे षच् ।) रोचनी । इति शब्दचन्द्रिका ॥

पिकाङ्गः, पुं, (पिकस्याङ्गमिव अङ्गं यस्य ।) पक्षिविशेषः । इति शब्दचन्द्रिका ॥

पिकानन्दः, पुं, (पिकानामानन्दो यस्मिन् ।) वसन्तकालः । इति राजनिर्घण्टः ॥

पिकी, स्त्री, (पिक+स्त्रियां ङीष् ।) कोकिला । इति राजनिर्घण्टः ॥

पिकेक्षणा, स्त्री, (पिकस्य ईक्षणं लोचनं तद्वत् वर्णो यस्याः ।) कोकिलाक्षः । इति राजनिर्घण्टः ॥ कोकिलचक्षुस्तुल्यचक्षुर्युक्ता च ॥

पिक्कः, पुं, (पिक् इत्यव्यक्तशब्देन कायति शब्दायते इति । कै+कः । पिक इव कायतीति । पृषोदरादित्वात् साधुरित्येके ।) हस्तिशावकः । इति शब्दमाला ॥

पिङ्ग, क्ली, (पिङ्क्तीति । पिजि वर्णे+अच् । न्यङ्क्वादित्वात् कुत्वम् ।) बालकः । इति मेदिनी । गे, १२ ॥ हरितालम् । इति राजनिर्घण्टः ॥

पिङ्गः, पुं, (पिजि वर्णे+अच् । कुत्वञ्च ।) पिङ्गलवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १६ ॥ (यथा, महाभारते । १ । १२३ । ३२ ।
"पद्मपत्राननः पिङ्गस्तेजसा प्रज्वलन्निव ॥")
मूषकः । इति राजनिर्घण्टः ॥

पिङ्गकपिशा, स्त्री, (पिङ्गा कपिशा च । वर्णो वर्णेनेति समासः ।) तैलपायिका । इति हेमचन्द्रः । ४ । २७३ ॥

पिङ्गचक्षुः, [स्] पुं, (पिङ्गे चक्षुषी यस्य ।) कुम्भीरः । इति हेमचन्द्रः । ४ । ४१८ ॥

पिङ्गजटः, पुं, (पिङ्गा पिङ्गलवर्णा जटा यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११३ ॥

पिङ्गलं, क्ली, (पिङ्गं लातीति । ला+कः ।) रीतिः । इति राजनिर्घण्टः ॥

पिङ्गलः, पुं, (पिङ्गो वर्णोऽस्यास्तीति । पिङ्ग+"सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) नीलपीतमिश्रितवर्णः । तत्पर्य्यायः । कडारः २ कपिलः ३ पिङ्गः ४ पिशङ्गः ५ कद्रुः ६ । तद्वति, त्रि । इत्यमरः । १ । ५ । १६ ॥ केचित् द्वयं द्वयं पर्य्यायमाहुः । अत्र नीलपीतः कपिलः । रोचनाभः पिशङ्गः । कनकपिङ्गलः कद्रुः । इति सुभूतिः ॥
"पिशङ्गो रोचना पाण्डुः कद्रुः कनकपिङ्गलः ॥"
इति नाममाला ॥
"पिङ्गदीपशिखाभः स्यात् पिशङ्गः पद्मधूलिवत् ।
पीतनीलहरिद्रक्तः कडारस्तृणवह्निवत् ॥
कद्रुस्तूद्रिक्तः पीताङ्गः कपिलो रोचनाच्छवः ॥
इत्यत्र भेदोऽपि दृश्यते । अल्पभेदत्वादिहासौ नादृतः ।" इति तट्टीकायां भरतः ॥ * ॥ नागभेदः । (यथा, महाभारते । १ । ३५ । ८ ।
"निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा ॥")
रुद्रः । चण्डांशुपारिपार्श्विकः । निधिभेदः । कपिः । अग्निः । इति मेदिनी । ले, ११३ ॥ मुनिविशेषः । (यथा, महाभारते ।१।५३।६।
"ब्रह्माभवत् शार्ङ्गरवो अध्वर्य्युश्चापि पिङ्गलः ॥")
नकुलः । स्थावरविषविशेषः । इति हेमचन्द्रः । ४ । १६५ ॥ क्षुद्रोलूकः । इति राजनिर्घण्टः ॥ (यक्षविशेषः । यथा, महाभारते ।३।२३०।५१।
"पिङ्गलो नाम यक्षेन्द्रो लोकस्यानन्ददायकः ॥"
पर्व्वतविशेषः । इति ब्रह्माण्डपुराणम् ॥)
प्रभवादिषष्टिवर्षान्तर्गतैकपञ्चाशत्तमवर्षः । यथा,
"देशभङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपर्ज्जाश्चि ! दुर्भिक्षं नर्म्मदातटे ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
पिङ्गलाचार्य्यकृतच्छन्दोग्रन्थविशेषः । यथा,—
"जो विविहमत्तसायरपारं पत्तो विविमलमइ हेलम् ।
पढ़मं भासतरण्डो णाओसो पिङ्गलो जयइ ॥"
अस्य व्याख्या ।
"अथ छन्दःशास्त्रकर्त्तुः पिङ्गलाचार्य्यस्य स्तुतिरूपं मङ्गलं निर्विघ्नग्रन्थपरिसमाप्तये ग्रन्थकृत् करोति । विविधा नानाप्रकारकविन्यासविशिष्टा मात्रा यत्र तद्विविधमात्रं छन्दःकदम्बं तदेवं सागरः अतिदुर्गमत्वात् भाषा एव तरण्डा नौर्यस्य । प्राकृते ह्रस्वता तेन भाषयैव छन्दःशास्त्रसूत्रवानित्यवगम्यते । केचित्तु लघुगुरुरूपा या विविधा मात्रा सैव सागरः तत्पारं प्राप्तः अपरिवधारणी । विमलया मत्या हेला यत्र तद्यथा स्यात् निर्म्मलबुद्ध्या हेलयैव पारं गत इत्यर्थः । प्रथममित्यनेन छन्दःशास्त्रस्य प्रथमप्रणेतायमित्यवगम्यते । अर्थान्तरमप्यनेनैव व्यज्यते यो विविधमात्राभिः सागरपारं प्राप्तः विः पक्षी अर्थाद्गरुड़ः तस्य विमलमतौ हेला यत्र तत् यथा स्यात् भाषा अनुनयवाक् सैव नौर्यस्य ईदृशो नागो जयति । एवं हि श्रूयते भोक्तुमुद्यतं गरुड़ं दृष्ट्वा सकौशलं सविनयं तमुवाच भो गरुड़ ममेदं कौशलं पश्य यद्येकवारंलिखितं मया लिख्यते तदा मां भक्ष इत्युक्ता सागरतीरं षड्विंशत्यक्षरपर्य्यन्तं प्रस्तारं प्रदर्श्य समुद्रं प्रविवेश गरुड़ोऽपि वचनां गुरुत्वेन तत्र मत्वा तद्देशाद्विरराम एतादृशं बुद्धिगौरवं यस्य अतएव जयति उत्कर्षेण वर्त्तते तं प्रति प्रणतोऽस्मीति व्यज्यते अथवा गाथायां भगणोपन्यासो मङ्गलार्थः प्रथमं भ्रश्यौदासीनयोर्भगणजगणयोर्योगोऽनुचितोऽपि कथमित्यवहितैर्भाव्यम् ।" इति पिङ्गलग्रन्थस्तट्टीका च ॥

पिङ्गललोहं, क्ली, (पिङ्गलं लोहमिति नित्यकर्म्मधारयः ।) पित्तलम् । इति राजनिर्घण्टः ॥

पिङ्गला, स्त्री, (पिङ्गल+टाप् ।) वामनाख्यदक्षिणदिग्गजस्य स्त्री । इत्यमरः । १ । ३ । ४ ॥ कुमुदस्य करिणी । वेश्याविशेषः । इति मेदिनी । ले, ११३ ॥ तस्या उपाख्यानं यथा,—